# विद्यापीठप्राङ्गणे श्रीजगन्नाथरथयात्रा

## CAR-FESTIVAL OF LORD SRIJAGANNATH IN VIDYAPEETHA

प्रतिसंवत्सरम् आषाढमास-शुक्लपक्ष-द्वितीयातिथौ ओडिशाराज्यस्य सुप्रसिद्धे पुरीक्षेत्रे शङ्खक्षेत्रे पुरुषोत्तमक्षेत्रे वा श्रीजगन्नाथमहाप्रभोः रथयात्रा गुण्डिचायात्रा वा महता वैभवेन परिपाल्यते । तदवसरे देशविदेशेषु निर्मितेषु सर्वेषु जगन्नाथमन्दिरेष्वपि उत्सवस्यास्य परिपालनं तद्भक्तगणैरवश्यं क्रियते'। महतः सौभाग्यस्य विषयोऽयं यत् नियतपवित्रिते विद्यापीठप्राङ्गणे योगमन्दिरे प्रतिष्ठापिते उत्कलपीठे विद्यमानानां श्रीजगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनाख्यानां चतुर्धामूर्त्तीनां रथयात्रामहोत्सवः १४.०७.२०१८ दिनाङ्के अन्ताराष्ट्रियश्रीकृष्णचेतनासंघस्य मिलितसहयोगेन समायोजि । विविध-वैदिकघोषैः मन्त्रैः नानावस्त्रालङ्कारविभूषितानां विग्रहाणां मन्दिरान्तः-सिंहासनात् आनीय रथोपरि संस्थापनमक्रियत । पुरीनगरे विग्रहाणामानयम् "पहण्डिविजे" इति कथ्यते । ततः यथा पुरीनगरस्य गजपतिमहाराजः स्वर्णमार्जन्या रथपरिष्करणं करोति, तथैव विद्यापीठस्य प्रमुखाधिकारिणः कुलपतयः रथमार्जनमकुर्वन् । एवं रथस्य शोभायात्रा तिरुपतिनगरे राजमार्गे आयोजिताऽभवत् । शोभायात्रायां विद्यापीठस्य कुलपतयः, कुलसचिवाः, अधिकारिणः, अध्यापकाः, कर्मचारिणः, तेलुगुदेशम् दलस्य प्रमुखनेतारः वुक्कविजयकुमारमहोदयाः, ISKCON संस्थायाः जनसम्पर्काधिकारिणः लीलापारायणदासमहाभागाः, तिरुपतिनगरवासिनः शताधिकाश्च जनाः सोत्साहं भागमगृह्णन् ।



जनवाक्यं तु कर्तव्यम् । (One Should act according to the peopl's voice.)




The Success of Great People






YOGA MANDIRAM

